# क्षनिका-सप्तकम्

**डॉ. शिवचरण शर्मा**
प्रधानाचार्य
राजकीय वरिष्ठ उपाध्याय संस्कृत विद्यालय, नारेडा, फागी, जयपुर

**कुर्वव्यः** क्षणमात्रेण हास्यसम्प्लावितान् जनान्।
श्रोतव्याःक्षणिकाःसर्वे मनोविनोदहेतुकाः।।

नववधूः समायाता, गृहं स्वर्गः कृतस्तया।
बिना पुण्येन सञ्जाता गृहस्थाः स्वर्गवासिनः।।

निकटागमनं वर्ज्यं हस्तसम्मेलनं तथा।
किं क्रोधोऽद्य समुत्पन्नः न 'स्वाइनफ्लू' सावे।।

वैरं लक्ष्मीसरस्वत्योर्मिथ्येयं मान्यता कृता।
यतो गुरुजनैर्गेहे शिक्षाशुल्क्युता कृता।।

पत्नी ब्रूते पतिं दृष्ट्वा, विषंपीत्वापि जीवितम्।
क्रेतव्यं वस्तु विज्ञाय, विना कार्यं गतं धनम्।।

अन्यायः सर्वथा लोके, उत्कोप इति मन्यते।
स्वीकरोति ग्रहिता वै, अन्य आयः सदा प्रियः।।

आश्चर्यजनकं किञ्चिद्, वक्तव्यमिति कथ्यते।
दशनिमेषपर्यन्तं, तूष्णीं द्वे महिले स्थिते।।

गलार्थं ते किमानैयं पृष्टवान् पीडितां पतिः।
झटित्युक्तवती पत्नी, मौक्तिकहार एव सः।।

श्वायोग्यपिष्टकान्यत्र, प्राप्स्यन्ते वा तवापणे।
वदत्यापणिक इत्यत्र भुङ्क्ते नेष्यति वा गृहम्।।

वस्त्वैकं दृश्यते द्वे मां श्रुत्वा ब्रूते चिकित्सकः।
बाधते किमसौ रोगो, भवतश्चतुरो जनान्।।

पृच्छति पितरं पुत्रः, स्वातन्त्र्यदिवसः कदा।
पितोत्तरति ते माता, याति मातृगृहं तदा।।

कश्चिद वक्ति न लज्जा ते, भिक्षोः भिक्षाटने क्वचित्।
ब्रूते भिक्षुः कथं कोवा गृहमागत्य दास्यति।।

कश्चित् पृच्छति मित्रं स्वं, सुखं किं नाम जीवने।
किं जाने भो विवाहो में बाल्येऽभूदिति वक्ति सः।।

कियान् व्ययो भवेद्गन्तुं विचारयाम्यमेरिकाम्।
चिन्तने न व्ययः कश्चित् स्वर्गं गच्छ यदीच्छसि।।